# २२ द्वाविंश दशकः - कृष्ण कथा

श्रियःपति र्गोमल मूत्र गन्धिनि अस्त प्रभो गोपकुले विषण्णः ।
कृष्णाभिधो वत्स बकादि भीतो रुदन् सदा देवि निनाय बाल्यम् ॥ २२-१॥

हैयङ्गवीनं मथितं पयश्च गोपी र्विलज्जः सततं ययाचे ।
स चाम्बया गोर सचौर्य चुञ्चुः उलूखले पाशवरेण बद्धः ॥ २२-२॥

वनेषु भीमा तप शुष्क गात्रो गाश्चारयन् कण्टक विद्ध पादः ।
वन्याम्बुपायी फलमूल भक्षी दिने दिने ग्लानि मवाप कृष्णः ॥ २२-३॥

दैवेन मुक्तः स च गोपदास्यात् अक्रूरनीतो मथुरां प्रविष्टः ।
कंसं निहत्यापि हताभिलाषः तत्रोग्रसेनस्य बभूव दासः ॥ २२-४॥

दृष्ट्वा जरासन्ध चमूं भयेन स बन्धुमित्रो मथुरां विहाय ।
धावन् कथञ्चि द्बहुदुर्ग मार्तः स द्वारका द्वीपपुरं विवेश ॥ २२-५॥

स रुक्मिणीं जाम्बवतीं च भामां कन्यास्तथा द्व्यष्ट सहस्रमन्याः ।
समुद्वहन् सस्मित नर्मलापः क्रीडामृगोऽभूत्सततं वधूनाम् ॥ २२-६॥

स दस्युवृत्ति स्त्रिदिवाज्जहार भामा नियुक्तः सुर पारिजातम् ।
सत्या च तं गोवृष वत्सरोषं बद्ध्वा तरौ दुर्वचसाऽभ्यषिञ्चत् ॥ २२-७॥

श्रीनारदा यातिथये तया स दत्तोथ मुक्तो मुनिना च नीतः ।
ततस्तयाऽस्मै कनकं प्रदाय पुन र्गृहीत स्त्वपयाऽऽप मौनम् ॥ २२-८॥

सूतीगृहा द्धीष्म कजासुते स प्रद्युम्न नाम्नीश्वरि शम्बरेण ।
हृते शिशौ निर्मथि ताभिमान उच्चै रुदंस्त्वां शरणं प्रपन्नः ॥ २२-९॥

पुत्रार्थिनीं जाम्बवती मपुत्रां स तोषयिष्य न्नुपमन्यु शिष्यः ।
मुण्डी च दण्डी च शिवस्य शैले मन्त्रं जपन् घोर तपश्चकार ॥ २२-१०॥

वरेण भर्गस्य दशात्मजान् सा प्रासूत सर्वा दयिताश्च शौरेः ।
तथैव लब्ध्वा स सुतायुतानि सुखं न लेभे निजकर्म दोषात् ॥ २२-११॥

शापादृषीणां धृतराष्ट्र पत्न्याः चान्योन्य वैरेण कृताहवेषु ।
सर्वे हता हन्त कुलं यदूनां महत्प्रदग्धं वनमग्निनेव ॥ २२-१२॥

व्याधेषु विद्धो मृतिमाप कृष्णः कुशस्थली चाब्धि जलाप्लुताऽभूत् ।
हा जह्रिरे दस्युभिरेनसाऽष्टा-वक्रस्य शापेन यदुस्त्रियश्च ॥ २२-१३॥

एवं हरिः कर्मफला न्यभुङ्क्त न कोऽपि मुच्येत च कर्मबन्धात् ।
दुःखं त्वभक्तस्य सुदुस्सहं स्यात् भक्तस्य ते तत्सुसहं भवेच्च ॥ २२-१४॥

जानास्यहं ते पदयो रभक्तो भक्तो नु किं वेति न चैव जाने ।
त्वं सर्वशक्ता कुरु मां सुशक्तं सर्वत्र भूयोऽपि शिवे नमस्ते ॥ २२-१५॥

** वसुदेव सुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥
सदा सर्वत्र गोविन्द नाम सङ्कीर्तनम् गोविन्दा गोविन्दा । **